# Shri Svaminarayana Dhyana Stotram

# શ્રીસ્વામિનારાયણધ્યાનસ્તોત્રમ્

## Document Information

Text title : Shri Svaminarayana Dhyana Stotram

File name : svAminArAyaNadhyAnastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, dhyAnam, stotra

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# Shri Svaminarayana Dhyana Stotram

# શ્રીસ્વામિનારાયણધ્યાનસ્તોત્રમ્

આદૌ પ્રેમવતીવૃષાઙ્ગજનનં સન્નૈકતીર્થાટનં
દુષ્કર્મોપશમં ચ સાધુશરણં સદ્ધર્મસંસ્થાપનમ્ ।
હિંસાવર્જિતભૂરિયજ્ઞકરણં મૂર્તિપ્રતિષ્ઠાપનં
આર્યસ્થાપનમક્ષરાખ્યગમનં સત્સઙ્ગિસજ્જીવનમ્ ॥ ૧॥

શ્રીમચ્છારદપૂર્ણચન્દ્રવિલસત્સ્મેરાનનં શ્રીહરિં
તુઙ્ગે પીઠવરે સ્થિતં પરિવૃતં સદ્ભક્તવૃન્દૈર્યથા ।
તારાભિર્વિધુમર્ચ્યમાનમુરુધા તૈશ્ચન્દનૈઃ કૌસુમૈ-
હરૈઃ શેખરપઙ્ક્તિભિશ્ચ હૃદયે શુક્લામ્બરં ચિન્તયે ॥ ૨॥

પાતું ધર્મમધર્મમુત્ખનયિતું શ્રીભક્તિધર્માઙ્ગતો
જાતાયોત્તરકોશલેષુ દયયા સર્વેશ્વરેશાય ચ ।
તૃપ્તિં વાક્યસુધારસૈર્વિદધતે નૈજૈર્નિજાનાં મુહુ-
તસ્મૈ શ્રી હરયે નમોઽસ્તુ સહજાનન્દાય સદ્વર્ણિને ॥ ૩॥

સ્નાતં ચન્દનચર્ચિતં નિજજનૈઃ પુષ્પસ્રજાલઙ્કૃતં
પ્રાતઃ સૂર્યમયૂખસેવિતમુખં શ્રીચન્દ્રશાલોપરિ ।
ધૃત્વા રોટકમેકપાણિતલકે ભક્ત્વાન્યહસ્તેન તં
નં પ્રવિલોક્ય સેવકગણાન્ વન્દે સદા સ્વામિનમ્ ॥ ૪॥

સ્ત્રીપુંસૈર્જયતલ્પપત્તનબહિર્વાટીવટે વેષ્ટિ
દો તૂલપટોપબર્હણપટૈર્જુષ્ટે ચલન્મૂર્તયે ।
હસ્તે કોમલકર્કટીફલયુગં ધૃત્વા વિલોક્ય સ્વકાન્
દન્તૈશ્ચર્વણચાતુરીં વિદધતે તસ્મૈ નમઃ સ્વામિને ॥ ૫॥

શ્રીજુષ્ટે વટપત્તને નૃપપથે ભૂપસ્ય હર્મ્યાઙ્ગણે
નાગેન્દ્રો પરિરૂઢમીડિતપદં ભૂપેન ભક્ત્યા ભૃશમ્ ।
નાનારત્નમણીન્દ્રમૌક્તિકલતં હેમોદ્ભવં ભૂષણં
મૂર્ધાગ્રે દધતં દધામિ હૃદિ તં શ્રીસ્વામિનારાયણમ્ ॥ ૬॥

શ્રી ધાર્મિઃ પુરુષોત્તમો ગુણનિધિર્યો બ્રહ્મધામેશ્વરો
મુક્તૈર્જુષ્ટપદામ્બુજો વરતરૈશ્વર્યૈરુપેતઃ પ્રભુઃ ।
અન્તર્યામ્યખિલાત્મનાં ભવહરઃ સર્વેશ્વરાધીશ્વર-
સ્તં ધ્યાયામ્યવતારિણં મુનિપતિં શ્રીસ્વામિનારાયણમ્ ॥ ૭॥

ધર્મસ્ત્યાજ્યો ન કૈશ્ચિત્સ્વનિગમવિહિતો વાસુદેવે ચ ભક્તિ-
દિવ્યાકારે વિધેયા સિતઘનમહસિ બ્રહ્મણૈક્યં નિજસ્ય ।
નિશ્ચિત્યૈવાન્યવસ્તુન્યણુમપિ ચ રતિં સમ્પરિત્યજ્ય સન્ત-
સ્તન્માહાત્મ્યાય સેવ્યા ઇતિ વદતિ નિજાન્ ધાર્મિકો નીલકણ્ઠઃ ॥ ૮॥

દૃષ્ટાઃ સ્પૃષ્ટા નતા વા કૃતપરિચરણા ભોજિતાઃ પૂજિતા વા
સદ્યઃ પુંસામઘૌઘં બહુજનુજનિતં ઘ્નન્તિ યે વૈ સમૂલમ્ ।
પ્રોક્તાઃ કૃષ્ણેન યે વા નિજહૃદયસમા યત્પદે તીર્થજાતં
તેષાં માતઃ પ્રસઙ્ગાત્ કિમિહ નનુ સતાં દુર્લભં સ્યાન્મુમુક્ષોઃ ॥ ૯॥

નારં સારં શુચિકનકબુટ્ટૈ પરિદધન્-
નિચોલં કૌસુમ્ભં કટિતટપટં ચારુણરુચિમ્ ।
બહૂન્ હારાન્ હૈમાન્ વરવલયકેયૂરમુકુટાન્
હસદ્વક્ત્રેન્દુર્મે દૃશિ જયતુ નારાયણમુનિઃ ॥ ૧૦॥

ય ઈશોઽપિ સ્વેચ્છાધૃતનૃતનુરાનન્દનિલયઃ
કૃપાસિન્ધુર્બન્ધુર્ભવજલનિધૌ દુઃખિતનૃણામ્ ।
સકામૈર્નિષ્કામૈરપિ સુરનરૈઃ સેવ્યચરણં
નમામ્યાત્માત્માનં તમહમિહ નારાયણમુનિમ્ ॥ ૧૧॥

શ્રીમદ્બ્રહ્મપુરાધિપઃ શ્રુતિશિરોભિર્ગીયતે યોઽનિશં
નૈકાણ્ડાધિપતિઃ ક્ષરાક્ષરપરઃ કારુણ્યપાથોનિધિઃ ।
સર્વાત્મા જગતાં ભવન્તિ ચ યતો જન્માદયઃ સર્વત-
સ્તં ધ્યાયામિ હરિં સદા વૃષભુવં શ્રીસ્વામિનારાયણમ્ ॥ ૧૨॥

યઃ પાઞ્ચાખ્યપિતુર્ગૃહે વૃષપુરે દેવ્યાં દયાશેવધિઃ
સર્વેશો ભગવાન્ સ્વયં સુદયયા પ્રાદુર્બભૂવ પ્રભુઃ ।
ભૂમાવત્ર સમાનયચ્ચ પરમાં યોઽનાદિમુક્તસ્થિતિં
તં બાપાશુભનામધેયમનિશં પ્રેષ્ઠં મુદા ચિન્તયે ॥ ૧૩॥

સઙ્કલ્પેન નનુ સ્વયં ભગવતો ભૂમૌ ચચારાત્ર યો

યસ્મૈ સ્વીયભરં ચ ધાર્મિરખિલં પ્રીત્યા સ્વયં દત્તવાન્ ।
જ્ઞાતા યશ્ચ હરેઃ સદૈવ નિખિલાભિપ્રાયકસ્ય સ્વયં
વન્દે યોગિવરં હિ તં ગુરુવરં ગોપાલબાપાભિધમ્ ॥ ૧૪॥

યં ગોપાલમુનીશ્વરઃ સ્વકપદે પ્રીત્યા સમસ્થાપયદ્
યેનોપાસનમત્ર બોધિતમતિશ્રેષ્ઠં ત્વપૂર્વં હરેઃ ।
બાપા શ્રીમહિમાપિ યેન પરમઃ કૌ બોધિતઃ શર્મદો
વન્દે નિર્ગુણનામધેયમનિશં શ્રીસદ્ગુરું તં મુદા ॥ ૧૫॥

યો ગોપાલમુનીન્દ્રતુલ્યમહિમા રેજે જગત્યામિહ
પાશ્રીઃ સ્વમુખેન યં ચ નિખિલાચાર્યોઽયમિત્યાહ વૈ ।
બાપા શ્રીવચસાં હિ યઃ કરુણયા સંલેખનં ચાકરોદ્
વન્દે શ્રીશ્વરસદ્ગુરું ગુરુવરં હ્યાનન્દદં તં સદા ॥ ૧૬॥

શ્રીમદ્બ્રહ્મપુરેશ્વરાક્ષરપરશ્રીસ્વામિનારાયણ-
સઙ્કલ્પેન ભુવસ્તલે પ્રકટિતો બાપાસ્વરૂપશ્ચ યઃ ।
સર્વાચાર્યશિરોમણિર્ગુણનિધિઃ શ્રીસ્વામિનારાયણ-

ઇતિ શ્રીહરિસ્વામિનારાયણધ્યાનસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Svaminarayana Dhyana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*